**2021**

**Sanskrit**

**[Third Semester]**

**Paper - C6T**

*Full Marks : 60*

*Time : 3 hours*

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

**A. संस्कृतभाषया देवनागरीलिप्या च दश प्रश्नाः समाधेयाः। 2×10=20**

1. कठोपनिषत् कस्मिन वेदे अन्तर्भवति? तत्र कति अध्यायाः सन्ति?

2. वैवस्वतः कः? सः किमर्थं नजिकेतसे त्रीन् वरान् ददौ?

3. नचिकेतसः पिता यज्ञे दक्षिणारूपेण दानार्थं कीदृशीः गाः नयति स्म?

4. आत्मा केन लभ्यः?

5. त्रिणाचिकेताः -इत्यस्य कोऽर्थः? सृङ्काशब्दस्य कोऽर्थः?

6. धीरः कीदृशं देवं मत्वा हर्षशोकौ जहाति?

7. यमेन प्रदत्तः द्वितीयः वरः कः?

8. मन्त्रं पुरयत- स्वर्गे लोके न ...स्वर्गलोके।।

9. भगवान् आदौ कर्मयोगं कस्मै प्रोक्तवान्? स च योगः कथं नष्टः?

10. भगवता किम् आश्रित्य चातुर्वर्ण्यं सृष्टम्?

11. तत्त्वदर्शिनः ज्ञानिनः कथं ज्ञानम् उपदेक्ष्यन्ति?

12. भगवद्गीतायाः आधारग्रन्थः कः? गीतायां कति अध्यायाः सन्ति?

13. कीदृशः जनः ज्ञानं लभते?

14. "स बुद्धिमान् मनुष्येषु"–कः मनुष्येषु बुद्धिमान्?

15. श्लोकं पुरयत – ये यथा मां ... सर्वशः॥

**B. चत्वारो व्याख्येयाः संस्कृतभाषया देवनागरीलिप्या च। 4×5=20**

1. अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे।
   सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः॥

2. येयं प्रेते विचिकित्सा मनुष्ये
   ऽस्तीत्येके नायमस्तीति चैके।
   एतद्विद्यामनुशिष्टस्त्वयाहं
   वराणामेष वरस्तृतीयः॥

3. अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थ पुरुषं सिनीतः।
   तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते॥

4. न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।
   अजो नित्यं शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥

5. इमं विरस्वते योगं प्रोक्तवानहमव्ययम्।
   विवस्वान् मनवे प्राह मनुरिक्ष्वाकवे ऽ ब्रवीत्।

6. तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
   उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः॥

7. श्रेयान् द्रव्यमयाद्यज्ञाज् ज्ञानयज्ञः परन्तप।
   सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥

**C. द्वौ सविस्तरं समाधत्त।** **10×2**

1. कठोपनिषदः प्रथमाध्यायस्य द्वितीयवल्लीम् अनसृत्य आत्मस्वरूपं वर्णयत।
2. नचिकेतसः तृतीयवरप्रसङ्गे यम-नचिकेतसोः संवादस्य सारं विवृणुत॥
3. श्रीमद्भगवद्गीतायाः चतुर्थाध्यायम् अवलम्ब्य ज्ञानस्य माहात्म्यं प्रतिपादनीयम्।
4. श्रीमद्भगवद्गीतायाः चतुर्थाध्यायम् अवलम्ब्य कर्मयोगम् ओलाचयत।